**Shodhshauryam, International Scientific Refereed Research Journal**
Available online at : **www.shisrrj.com**
OPEN ACCESS
© 2025 SHISRRJ | Volume 8 | Issue 4
ISSN : 2581-6306
**doi :** https://doi.org/10.32628/SHISRRJ258454

# धर्मशास्त्रे सन्धिगुणविमर्शः

**डा.सुधांशुशेखरमहापात्रः,**
सहाचार्यः,धर्मशास्त्रविभागस्य, राष्ट्रियसंस्कृतविश्वविद्यालयः,तिरुपतिः, आन्ध्रप्रदेशः

**Article Info**
Accepted : 25 June 2025
Published : 03 July 2025

**Publication Issue :**
July-August-2025
Volume 8, Issue 4
**Page Number :** 17-20

**सारांशः** -षाड्गुण्यंस्वरुपमादौ विवच्यते,सन्धिः तात्पर्यम् प्रतिपादितम्,मनुमतानुसारेण सन्धिभेदाः प्रतिपादिता,आचार्यकौटिल्यानुसारेण सन्धिगुणस्य बहवो भेदाः प्रदर्शिताः,कामन्दकमतानुसारेण सन्धेः षोडश प्रकाराः,विषयवस्तुश्च मयासरलरीत्या शोधलेखे उपस्थाप्यते।

**मुख्यशद्वः-सन्धिः**-व्यवस्थाकरणम्,**विग्रहः**- अपकारः, **यानम्**-परं प्रति यात्रा, **आसनम्**-उपेक्षा,**द्वैधिभावः**-स्वबलस्य द्विधाकरणम्,**संश्रयः**-बलवदाश्रयणम्।

धर्मशास्त्रं खलु वेदाङ्गत्वेन वेदवत् प्रमाणं, मुनिमुखनिः सृतत्वेन लोकोपकारकंधर्मार्थकाममोक्षपदेष्ट्टरुपेण सकलहितसाधकं, शौचाचारनित्य-नैमित्तिककाम्यकर्मप्रतिपादकं सकलशास्त्रसमर्थितं प्राचिनतमं शास्त्रम्। तदेव धर्मशास्त्रम मुख्यत आचारव्यवहारप्रायश्चित्ताख्यैस्त्रिभिर्विषयभेदैर्विभाजितम्। तत्र व्यवहारविषये विचार्यमाणे राजधर्मप्रसङ्गे षाड्गुण्यं हष्टिपथमायाति। राजा एतान् सन्धिविग्रहादिगुणान् सम्यक् प्रयुज्य स्वाभिष्टसिद्धिं लभत इति धर्मशास्त्रेषु प्रतिपादितम्। विजिगीषो राज्ञः कर्त्तव्यविवेचनावसरे सामादीनामुपायानां षाड्गुण्येन सह घनिष्ठसम्बन्धो विद्यत इति नास्त्यत्र संशयः षड्गुणा एव षाड्गुण्यमिति स्वार्थे घञ् प्रत्यये कृते चातुर्वर्ण्यवत् तत्पदं सिध्यति। यद्यपि गुणशब्दस्य विभिन्नेषु शास्त्रेषु विभिन्ना अर्थाः स्वीकुतास्तथापि धर्मशास्त्रे गुणधर्मो राजधर्मस्य वाचक एव।

अभिषेकादिगुणयुक्तस्य राज्ञः प्रजापालनमेव परमोधर्म इति विज्ञानेश्वरादिभिः स्पष्टतया प्रतिपादनात् राज्ञो धर्मो गुणधर्म इति बोध्यते, स च राजा सुष्ठु प्रजाः पालयितुमिच्छन् यथाकालं सन्धिविग्रहादीनां प्रयोगं करोतीति हेतोः गुणशब्देन सन्धिविग्रहादय एव षड्गुण गृह्यन्ते। ते च षड्गुणाः के इत्याकाङ्खायामुक्तं[1] मनुना –

> सन्धिञ्च विग्रहञ्चैव यानमासनमेव च।
> द्वैधिभावं संश्रयञ्च षाड्गुण्यं चिन्तयेत् सदा ।। इति ।।

यद्यपि मनुरिव बहुभिराचार्यैः सन्धिविग्रहादयो गुणाः षडिति स्वीकृतास्तथापि आचार्यवातव्याधिना सन्धिविग्रहौ द्वावेवगुणौ स्वीकृतौ। तन्मते आसनादीनां चतुर्णां गुणानां सन्धिविग्रहयोरन्तर्भावो विवक्षितः। परन्तु कौटिल्येन वातव्याधिमतं खण्डितम्।

**Copyright © 2025 The Author(s):** This is an open-access article distributed under the terms of the Creative Commons Attribution **4.0 International License (CC BY-NC 4.0)**

एतेषु सन्धिविग्रहादिषु षट्सु गुणेषु प्रबन्धेऽस्मिन् केवलं सन्धिगुणस्य लक्षणभेदप्रदर्शनपुर्वकं मया विचार उपस्थाप्यते। तत्र सन्धिर्नाम व्यवस्थाकरणमिति[2] विज्ञानेश्वराः।

अयं मदिष्टं साधयिष्यति इत्याकारको विश्वासो यदा मनसि जायते तदा सन्धिर्भवति। यत्रापि पणपूर्वकं सन्धानं भवति सोऽपि सन्धिरिति कथ्यते। एतावता अस्य कार्यस्य करणे भूमि कोशदण्डान्यतमं दास्यामीत्युक्त्वा तस्य सत्यशपथादिना दृढिकरणपूर्विका या क्रिया सा सन्धिरिति तात्पर्यम्। यथा हि सम्भाव्ययुद्धोत्तरकाले निश्चितमात्मन आधिक्यं जानीयात् तदा वर्त्तमानकालेऽल्पहानिमङ्गीकृत्यापि सन्धिमाश्रयेत् । यथोक्तं[3] मनुना –

यदावगच्छेदायत्यामाधिक्यं ध्रुवमात्मनः।
तदात्वे चाल्पिकां पीडां तदा सन्धिं समाश्रयेत् ।। इति ।।

सन्धिरयं समानयानकर्मा, असमानयानकर्मेति भेदेन द्विविधः । प्रसङ्गेऽस्मिन्नुक्तं[4] मनुना –

समानयानकर्मा च विपरीतस्तथैव च।
तदा त्वायति संयुक्तः सन्धिज्ञेयो द्विलक्षणः।। इति ।।

एवमसौ द्विविधोऽपि[5] आचार्यकौटिल्येन सन्धिगुणस्य बहवो भेदाः प्रदर्शिताः। एवञ्च दण्डभूमिकर्महिरण्यमित्रादीनां लाभाय तेषां वर्गीकरणञ्च सुस्पष्टं कृतम् । तद्यथा –

समे हि लाभे सन्धिः स्याद्विषमे विक्रमो मतः।
समहीनविशिष्टानामित्युक्ताः सन्धिविक्रमाः।। इति ।।

[6]कामन्दकेन सन्धेः षोडश प्रकाराः प्रदर्शिताः। तेनोक्तं यथा– सन्धिविचक्षणाः पूर्वाचार्याः कपाल–उपहार–सन्तान–संगत–उपन्यास–प्रतिकार–संयोग–पुरुषान्तर–अदृष्टनर–आदिषु आत्याभिष उपग्रह–पटिक्रय–उच्छिन्न–पटदूषण–स्कन्धिभेदानां विचारः क्रमशः क्रियते । तेषु आदौ –कपालसन्धिः– शत्रुविजिगीष्वोरुभयोरैकात्म्यं विनैव यत् सन्धानमसौ कपालसन्धिरित्युच्यते। सन्धिरयं तत् क्षणातिमात्रघनग्रहणदुष्टत्वात् नातीवोपादेय इति कौटिल्यस्याभिप्रायः। **उपहारसन्धिः-** शत्रुविजिगीषोर्मध्ये द्रव्यदानपूर्वको यः सन्धिः स उपहारसन्धिरिति वाज्ञायते ।

**सन्तानसन्धिः**– कन्यादानं कृत्वा यत् सन्धानं स सन्धानाख्यसन्धिरिति। **संगतसन्धिः**– सज्जनेन राज्ञा सह सम्बन्धस्यापनाय यः सन्धिः स संगतसन्धिरिति कथ्यते। सन्धिरयं संज्ञितः । यथोक्तं[7] तेन –

सुवर्णसन्धिर्विश्वासादेकी भावगतो भवेत् ।

**उपन्याससन्धिः** - अयं शत्रुरुभयोरपकारी,मया अस्मिन्नुच्छिन्ने भवतोऽत्यर्थं सिद्धिरिति हेतुमुपन्यस्य यः सन्धिः क्रियते स उपन्याससन्धिः।

**प्रतिकारसन्धिः**–सन्धिरयं द्विविधः, पूर्वं मदीय उपकारः केनचित् कृतः पुनस्तस्योपकारकामनया यः सन्धिर्भवति स प्रथमप्रकारः। अहमिदानीमस्योकारं करोति, अयमपि मदियमुपकारं विधास्यतीति कामनया क्रियमाणो द्वितीयप्रकारकः। यथा रामेण सुग्रीवो वालिवधपूर्वकं राज्यदानेन पूर्वं पुरस्कृत इति रामायणीया कथा प्रसिद्धैव।

**संयोगसन्धिः**–शत्रुविजिगीष्वोः एकयातव्यविषयं गच्छतोः द्वयोर्यत्र संहतयोः प्रमाणं स संयोगसन्धिः सम्भूय एकत्र गमनात्।

**पुरुषान्तरसन्धिः** –त्वदीयेन मदीयेन च सेनापतिना मदर्थः साध्यः । अस्मद् भूमौ व्युत्थानादिकं प्रसाधयितव्यम्। अयं विजिगीषोः पुरुषान्तरसन्धानात् पुरुषान्तरसन्धिरित्युच्यते। अनेन सन्धिना राज्ञः सुरक्षा भवति इति हेतोः अयं आत्मरक्षासन्धिरित्यपि कथ्यते।

**अष्टपुरुषसन्धिः** – त्वयैव मदर्थः साध्य इति पणपूर्वकं क्रियमाणो यः सन्धिः सोऽदृष्टपुरुषसन्धिरिति कामन्दकेन प्रत्यपादि। अनेन सन्धिना दण्डमुख्यानामात्मनश्च रक्षणं भवतीति [8]कौटिल्येनापि भणितम् यथा–

एकेनान्यत्र यातव्यं स्वयं दण्डेन वेत्ययम् ।
अदृष्टपुरुषः सन्धिर्दण्डमुख्यात्मरक्षणः।। इति ।।

**आदिष्टसन्धिः** -ऊर्जितस्य शत्रोर्भूम्येकदेशेन सह सन्धिरादिष्टसन्धिः। कौटिल्य–मतानुसारेण तु जनपदस्य प्रकृतीनाञ्च रक्षणार्थं जनपदैकदेशदानेन यत् सन्धानं स आदिष्टाख्यः सन्धिरित्युच्यते ।

**आत्मामिषसन्धिः** - स्व सौन्येन सह स्वयंशत्रुसमीपमुपगम्य क्रियमाण सन्धि–रात्मामिषनामधेयः सन्धिः । शत्रुणा निर्दिष्टसंख्याकेन सैन्येन स्वशक्त्यनुरुघनेन च स्वयं यदा शत्रुसमीपं गत्वा उपस्थितो भवति तदाराघनाय तदात्मानमामिषीकृत्य स सन्धिर्विधीयत इति हेतोः असौ आत्मामिषसन्धिरिति कथ्यते।

**उपग्रहसन्धिः**-यत्र प्राणरक्षार्थं सर्वस्वं प्रदीयते तदुपग्रहसन्धिरिति। कौटिल्येन तु शत्रुणा निरुद्धस्यामात्यादेर्मुक्त्यर्थम् अमुकदेशे अमुककाले एतावत् घनं दास्यामीति एतावद् देयदानदेशकालादिल्पनं कृत्वा यदा सन्धिर्विधीयते तदासौ उपग्रहसन्धिरित्युच्यते ।

**परिक्रयसन्धिः**– बलवता शत्रुणा हतावशिष्टानां प्रकृतीनां मुक्त्यर्थं कोशस्यैकदेश–दानेन यदा सन्धिर्भवति तदाऽसौ परिक्रयसन्धिरिति कथ्यते।

**उच्छिन्नसन्धिः**-सारभूमिप्रदानाय यः सन्धिर्विधीयतेऽसौ उच्छिन्नसन्धिरित्युच्यते। स भूमिभ्यः कृत्स्नं फलं गृहीत्वा राजधानीदुर्गवर्जितानां सर्वासां तासां शत्रवेऽर्पणेन क्रियमाणः सन्धिरुच्छिन्नाख्यसन्धिरिति कौटिल्यस्याभिप्रायः।

**परदूषणसन्धिः**– यदा बलहीनो राजा समस्तमपि शस्यं वलवते शत्रवे समर्पयति तदा परदूषणख्यसन्धिरिति[9] कामन्दकेनोक्तम् । तद्यथा –

तद्भूमिफलदानेन सन्धिः स्यात् परदूषणः।

यावदुत्पद्यते भूमौ ततोऽप्यधिकं दातुं यत्र प्रतिज्ञा क्रियते स परदूषणसंज्ञकः सन्धिरिति कौटिल्यः।

**स्कन्धोपनेयसन्धिः**– किञ्चित् फलादिकं स्थाल्यां कृत्वा भृत्यस्य स्कन्धोपरि निधाय यदा शत्रुराजानमुपह्रियते तदोभयोर्मध्ये स्कन्धोपनेयसन्धिर्भवति इति[10] कामन्दकः स्वनीतिसारे प्रत्यपादत् एवं सन्धिलक्षणं कृत्वा यो राजा सम्यक् सन्धिं करोति सोऽवश्वमेव स्वाभीष्टं साधयितुं प्रभवतित्यत्र नास्ति संशयः इति ।

**उपसंहारः** - प्राचिनकाले राजतन्त्रशासनविधौ यथा सन्धिगुणस्य प्रयोगोऽदृश्यत सम्प्रत्यपि गणतन्त्रशासनविधौ सन्धिप्रयोगो दृश्यते। परन्तु सम्प्रति अनेकेषु सन्धिप्रकारेषु उपहारसन्धिः , संगतसन्धिः, प्रतिकारसन्धिः, पुरुषान्तरसन्ध्यादयः कतिचन दृश्यन्त,उपयुज्यन्ते च ।

**सहायकसूची-**


1.म.स्मृ-अ-7-श्लो-160

2.मिता-पृ-117

3.म.स्मृ-अ-7-श्लो-169

4.म.स्मृ-अ-7-श्लो-163

5.कौ.अ.7/115,8-9

6.का.नि.सा-1-2-4

7.कौ.अ.7/109,3-8

8.कौ.अ.7/102,3-4

9.का.नि.सा-9-19

10.का.नि.सा-9-20


**सहायकग्रन्थसूची-**


1. मनुस्मृतिः-चौखम्बासंस्कृत सीरिज, वारणसी, 1970.

2.मिताक्षरा(याज्ञ.टीका)-नागप्रकाशन, दिल्ली,1985.

3.कौटलीयार्थशास्त्रम्-संपा.पण्डितकुलमणिमिश्रशर्मा,नारायण प्रेस,पुरी,1986

4.कामन्दकीयनीतिसारः-ट्राभाङ्कर् गभर्मेण्ट प्रेस्,ट्रिवेण्ड्रम्,1912.